# .. kAveryaShTottarashatanAmAni ..

# ॥ कावेर्यष्टोत्तरशतनामानि ॥

ॐ अनन्त-गुण-गम्भीरायै नमः ।
ॐ अर्कपुष्कर-सेवितायै नमः ।
ॐ अमृतस्वादु-सलिलायै नमः ।
ॐ अगस्त्यमुनि-नायक्यै नमः ।
ॐ आशान्त-कीर्ति-तिलकायै नमः ।५।
ॐ आशुगागम-वर्द्धिन्यै नमः ।
ॐ इतिहास-पुराणोक्तायै नमः ।
ॐ ईतिबाधा-निवारिण्यै नमः ।
ॐ उन्मत्तजन-दूरस्थायै नमः ।
ॐ ऊर्जितानन्द-दायिन्यै नमः ।१०।
ॐ ऋषिसङ्घ-सुसंवीतायै नमः ।
ॐ ऋणत्रय-विमोचनायै नमः ।
ॐ लुप्त-धर्म-जनोद्धारायै ल्
ॐ लूनभाव-विवर्जितायै नमः ।
ॐ एदिताखिल-लोकश्रियै नमः ।१५।
ॐ ऐहिकामुष्मिक-प्रदायै नमः ।
ॐ ओङ्कारनाद-निनदायै नमः ।
ॐ ओषधीकृत-जीवनायै नमः ।
ॐ औदार्यगुण-निर्दिष्टायै नमः ।
ॐ औदासीन्य-निवारिण्यै नमः ।२०।
ॐ अन्तःकरण-संसेव्यायै नमः ।
ॐ अच्छ-स्वच्छ-जलाश्रयायै नमः ।
ॐ कपिलाख्य-नदी-स्निग्धायै नमः ।
ॐ करुणा-पूर्ण-मानसायै नमः ।
ॐ कावेरी-नाम-विख्यातायै नमः ।२५।
ॐ कामितार्थ-फल-प्रदायै नमः ।
ॐ कुम्बकोण-क्षेत्र-नाथायै नमः ।
ॐ कौतुकप्रथम-प्रभायै नमः ।
ॐ खगराज-रथोत्साह-रङ्गस्थल-सुशोभितायै नमः ।
ॐ खगावळि-समाक्रान्त-कल्लोलावळि-मण्डितायै नमः ।३०।
ॐ गजारण्य-सुविस्तीर्ण-प्रवाह-जनमोहिन्यै नमः ।
ॐ गायत्र्याख्य-शिला-मद्ध्यायै नमः ।
ॐ गरुडासन-भक्तिदायै नमः ।
ॐ घन-गम्भीर-निनद-निर्जरप्राप्त-निर्झरायै नमः ।
ॐ चन्द्रपुष्कर-मध्यस्थायै नमः ।३५।
ॐ चतुरानन-पुत्रिकायै नमः ।
ॐ चोलदेस-जनोद्धार-ग्रीष्मकाल-प्रवाहिन्यै नमः ।
ॐ चुञ्चक्षेत्र-समानीतायै नमः ।
ॐ छद्मदोष-निवारिण्यै नमः ।
ॐ जम्बूद्वीप-सरिच्छ्रेष्ठ-नदी-नद-गरीयस्यै नमः ।४०।
ॐ झङ्कारनाद-संस्पृष्ट-षट्पदाळि-समाकुलायै नमः ।
ॐ ज्ञानैक-साधन-परयै नमः ।
ॐ ज्ञप्तिमात्रर्ति-हारिण्यै नमः ।
ॐ टिट्टिभारावस-व्याज-दिविज-स्तुति-पात्रिण्यै नमः ।
ॐ ठङ्कारनाद-सम्भेद-झर्झरीकृत-पर्वतायै नमः ।४५।
ॐ डाकिनी-शाकिनी-सङ्घनी-वारण-सरित्तटायैनमः ।
ॐ ढक्का-निनाद-वारीण-पार्वतीश-समाश्रितायै नमः ।
ॐ णान्तवाच्य-द्विजाष्टाङ्गयोग-साधन-तत्परायै नमः ।
ॐ तरङ्गावलि-संविद्ध-मृदु-वालुक-शोभितायै नमः ।
ॐ तपस्विजन-सत्कार-निवेशित-शिलासनायै नमः ।५०।
ॐ तापत्रय-तरून्मूल-गङ्गादिभिरभिष्टुतायै नमः ।
ॐ धान्त-प्रमथ-संसेव्य-साम्भ-सान्निध्य-कारिण्यै नमः ।
ॐ दया-दाक्षिण्य-सत्कारशील-लोक-सुभावितायै नमः ।
ॐ दाक्षिणात्य-जनोद्धार-निर्विचार-दयान्वितायै नमः ।
ॐ धन-मान-मदान्धादि-मर्त्य-निर्वर्तन-प्रियायै नमः ।५५।
ॐ नमज्जनोद्धार-शीलायै नमः ।
ॐ निमज्जज्जन-पावनायै नमः ।
ॐ नागारिकेतु-निलयायै नमः ।
ॐ नाना-तीर्थाधि-देवतायै नमः ।
ॐ नारीजन-मनोल्लासायै नमः ।६०।
ॐ नानारूप-फल-प्रदायै नमः ।
ॐ नारायण-कृपा-रूपायै नमः ।
ॐ नादब्रह्म-स्वरूपिण्यै नमः ।
ॐ पराभूत-समस्ताघायै नमः ।
ॐ पशु-पक्ष्यादि-जीवनायै नमः ।६५।
ॐ पापतूलाग्नि-सदृशायै नमः ।
ॐ पापिष्ठजन-पावनायै नमः ।
ॐ फणीन्द्र-कीर्तित-कलायै नमः ।
ॐ फलदान-परायणायै नमः ।
ॐ बहुजन्म-तपो-योग-फलसंप्राप्त-दर्शनायै नमः ।७०।
ॐ बाहुरूप-द्विपार्श्वस्थ-स्वमातृक-जलार्थिनां

कलमक्षेत्र-शाल्यन्न-दान-निर्जित-वित्तपायै नमः ।
ॐ भगवत्कृत-संतोषायै नमः ।
ॐ भास्करक्षेत्र-गामिन्यै नमः ।

ॐ भागीरती-समाक्रन्त-तुलामास-जलाश्रयायै नमः ।
ॐ मज्जद्दुर्जन-प्राग्जन्म-दुर्जयांहः प्रमार्जन्यै नमः । ७५ ।
ॐ माघ-वैशाकादि-मास-स्नान-स्मरण-सौख्यदायै नमः ।
ॐ यज्ञ-दान-तपः-कर्मकोटि-पुण्य-फल-प्रदायै नमः ।
ॐ यक्ष-गन्धर्व-सिद्धाद्यैरभिष्टुत-पदद्वयायै नमः ।
ॐ रघुनाथ-पदद्वन्द्व-विराजित-शिलातलायै नमः ।
ॐ रामनाथपुरक्षेत्र-कामधेनु-समाश्रितायै नमः । ८० ।
ॐ लवोदक-स्पर्शमात्र-निर्वण-पद-दायिन्यै नमः ।
ॐ लक्ष्मी-निवास-सदनायै नमः ।
ॐ ललना-रत्न-रूपिण्यै नमः ।
ॐ लघूकृत-स्वर्ग-भोगायै नमः ।
ॐ लावण्य-गुण-सागरायै नमः । ८५ ।
ॐ वह्निपुष्कर-सान्निद्ध्यायै नमः ।
ॐ वन्दिताखिल-लोकपायै नमः ।
ॐ व्याघ्रपाद-क्षेत्र-परायै नमः ।
ॐ व्योमयान-समावृतायै नमः ।
ॐ षड्काल-वन्द्य-चरणायै नमः । ९० ।
ॐ षड्कर्म-निरत-प्रियायै नमः ।
ॐ षडास्य-मातृ-संसेव्यायै नमः ।
ॐ षडूर्मि-जित-सोर्मिकायै नमः ।
ॐ सकृत्स्मरण-संशुद्ध-तापत्रय-जनाश्रितायै नमः ।
ॐ सज्जनोद्धार-सन्धानसमर्थ-स्व-प्रवाहिन्यै नमः । ९५ ।
ॐ सरस्वत्यादि-देवीभिरभिवन्दित-निर्झरायै नमः ।
ॐ सह्यशैल-समुद्भूतायै नमः ।
ॐ सह्यासह्य-जन-प्रियायै नमः ।
ॐ सङ्गमक्षेत्र-सामीप्यायै नमः ।
ॐ स्ववशार्थ-चतुष्टयायै नमः । १०० ।
ॐ सौभरिक्षेत्र-निलयायै नमः ।
ॐ सौभाग्य-फल-दायिन्यै नमः ।
ॐ संशयाविष्ट-दूरस्थायै नमः ।
ॐ साङ्गोपाङ्ग-फलोदयायै नमः ।
ॐ हरि-ब्रह्मेश-लोकेश
-सिद्धबृन्दार-वन्दितायै नमः । १०५ ।
ॐ क्षेत्र-तीर्थादि-सीमान्तायै नमः ।
ॐ क्षपानाथ-सुशीतलायै नमः ।
ॐ क्षमातलाखिलानन्द-क्षेम-श्री-विजयावहायै नमः । १०८ ।

॥ इति कावेर्यष्टोत्तरशत नामावलिः ॥

Encoded and proofread by
N. Balasubramanian bbalu at sify.com